# ९. सूक्तिकुसुमानि ।

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. अलब्धं कथम् ईहेत् ? (K)
2. केषां मनः निश्चलम् ? (K)
3. नभसोऽपि किं महत् ? (K)
4. आहारार्थं कीदृशं कर्म कुर्यात्?(K)
5. कन्दैः फलैः के कालं क्षपयन्ति ? (K)
6. तृणैः के बलिनः भवन्ति ? (K)
7 प्रच्छन्नगुप्तं धनं किम् ? (K)
8. सन्तोषः कस्य परं निदानम् (K)?
9. हुतभुक् केन वारयितुं शक्यः? (K)
10. का गरीयसी ? (K)
11. कस्य औषधं नास्ति ? (K)

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. तत्त्वविज्ञानहेतोः किं करणीयम्? (K)
2. सुभाषितोक्तरीत्या लोकस्थितिः कीदृशी? (K)
3. सुभाषिते विद्या कथं प्रशंसिता? (K)
4. सुभाषितकारः मूर्खं कथं वर्णयति ? (K)

**III मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. लब्धं यत्नेन ............। (S)
2. चलन्ति.........कामम् । (S)
3. ..........निश्चलं मनः न चलति । (S)
4. येन भूयो न ............ । (S)
5. ............ पुरुषस्य परं निदानम्। (S)
6. विद्या.........पूज्यते । (S)
7. .........नास्त्यौषधम् । (S)

( मूर्खस्य, धीराणाम्, जन्म, गिरयः, सन्तोष एव, राजसु, पालयेत् )

**IV संयोजयत ।** (S)

| अ | आ |
|---|---|
| विद्या | प्रीतिः |
| जलनिधिः | गरीयसी |
| सन्तोषः | परादेवता |
| आशा | आनन्दः |
| साधुजने | महत् |
| ब्रह्म | आर्जवम् |
| विद्वज्जने | सागरः |

**V पाठनाम उल्लिख्य अधोनिर्दिष्टश्लोकानाम् अनुवादं कन्नडभाषया आङ्ग्लभाषया वा कुरुत ।**

1. अलब्धमीहेद् धर्मेण लब्धं यत्नेन पालयेत् ।
   पालितं वर्धयेन्नित्यं वृद्धं पात्रेषु निक्षिपेत् ।। (C)

2. तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
   एतानि तु सतां गेहे नोच्छिद्यन्ते कदाचन ।। (C)

3. गिरिर्महान् गिरेरब्धिः महानब्धेर्नभो महत् ।
   नभसोऽपि महत् ब्रह्म ततोऽप्याशा गरीयसी ।। (C)

4. चलन्ति गिरयः कामं युगान्तपवनाहताः ।
   कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः ।। (C)

5. पापान्निवारयति योजयते हिताय
   गुह्यं निगूहति गुणान् प्रकटीकरोति ।

   आपद्गतं च न जहाति ददाति काले
   सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।। (C)

*************